न्या॰कौ॰
१

श्रीमते रामानुजाय नमः ध्यात्वा श्रीवांघ्रियुगलं विबुधैरुपास्यं नत्वा गुरोश्चरणपंकजमादरेण भूयो विभा
व्यसुधियातदुदीरितार्थं विद्वत्सु देकि मपि कौतुकमातनोमि १ ॰ प्रथमानुमानं निरूप्यते॰प्रत्यक्षसंगतं प्रपुंजीनेत्यमि
धक्रवचनात् प्रत्यक्षासंगतमनुमानं कथं प्रत्यक्षानंतरं निरूप्यत इति न शंक्यः व्याप्तिज्ञानाद्यात्मकानुमानस्यैंद्रिया
त्मकप्रत्यक्षकार्यतया कार्यत्वरूपसंगतेरेव सत्वचस्त्वात् नचसप्रसंग उपोद्घात हेतुता॰ ऽस्तु तथा निर्वाहके कारु
र्यत्वे षोढा संगतिरित्यत इत्यमिपुक्तो क्त प्रसंगत्वादि संगति विभाजकोपाधि प्रद्रूयानुमानं क्रांतस्य कार्यत्वस्य क
र्यसंगतित्व मितिवाच्यम् तत्रत्य हेतुता पदस्याजन्यार्थ लक्षणेन पानाद्यात्म निरूपकत्वान्यतर संबंधेन हे
तुतासंबंधेऽपरतया कार्यत्वस्य ताद्रूप्या संबंधित्वरूप संगति विभाजकोपाध्या क्रांतत्वात् न च प्रसक्तास्या
प्य दृष्टद्वारानुमानकार्यत्वेन दर्शितानुमानकारणे प्रत्यक्षसाधारणं कार्यत्वं रूपं संगतिः प्रत्यंतरा
भिधानत्वाव्यादि संगतिरित्यभियुक्तोक्तेः नंतराभिधानत्वाव्यत्वस्यैवसंगतिलक्षणत्वेन तदनाक्रांतत्वादिति
वाच्यम् संबंधविशेषस्यैव संगतिपदार्थतया विशेषस्य चरणकसंबंधिज्ञानमपरसंबंधिस्मारकमितिरीत्या सं

न्या॰
१

Title – न्याय कौमुदी
Accession No – Title –
Accession No –
Folio No/ Pages – 5/10
Lines-
Size
Substance Paper –
Script Devanagari
Language – संस्कृत
Period –
Beginning – श्रीमते रामानुजायनमः ध्यात्वा श्रीवां घ्रियुगलं विबुधैरुपास्यं ।
End – सासंप्रदर्शनात् विप्रायगां ददाति ।
Colophon-
Illustrations -
Source -
Subject - दर्शन
Revisor -
Author -
Remarks- अपूर्ण
[signature]

श्रीमते रामानुजाय नमः ध्यात्वा श्रीवांघ्रियुगलं विबुधैरुपास्यं नत्वा गुरोश्चरणपंकजमादरेण भूयो विभा
व्य सुधियां तदुदीरितार्थं विदन्तु देव किमपि कौतुकमातनोमि १ ॥ अथानुमानं निरूप्यते ॥ प्रत्यक्षसंगतं च पुंजीनेत्यभि
धक्रवचनात् प्रत्यक्षसंगतमनुमानं कथं प्रत्यक्षानंतरं निरूप्यत इति न शंक्यः व्याप्तिज्ञानाद्यात्मकानुमानस्यैव द्वीपा
त्मकप्रत्यक्षकार्यतया कार्यत्वरूपसंगतेरेव सत्त्वात् न च सप्रसंग उपोद्घातहेतुता ६ षट्प्रकारानिर्वाहकेकप्र
र्यत्वे बोधसंगतिरित्यनंत्यमिपुक्तौ कार्यत्वसंगत्यादि संगतिविभाजकोपाधिपञ्चकत्यानन्मानां कांतस्य कार्यत्वस्य क
र्यसंगतित्वमिति वाच्यम् न च प्रत्यक्षहेतुतापदस्याजहल्लक्षणया स्वार्थलक्षणया नादात्म्यनिरूपकत्वान्यतरसंबंधेन हे
तुतासंबंधेन परतया कार्यत्वस्य तादृशसंबंधित्वरूपसंगतिविभाजकोपाध्याक्रांतत्वात् न च प्रसंगस्या
प्यदृष्टद्वारानुमानकार्यत्वेन पूर्वाभिहितानुमानकारणप्रत्यक्षसाधारणं कार्यत्वरूपं संगतिः प्रसंगतरा
भिधानव्याप्त्यादि संगतिरित्यभिप्रेतेऽपि ॥ अनंतराभिधानव्याप्यत्वस्यैव संगतिलक्षणत्वेन तदनाक्रांतत्वादिति
वाच्यम् संबंधविशेषस्यैव संगतित्वदार्थतया विशेषस्य च एकसंबंधिज्ञानमपरसंबंधिस्मारकमितिरीत्यास्मृ

निरुक्तानंतराभिधानप्रयोजकतारूपत्वेन तादृशानंतराभिधानप्रयोजकसंबंधत्वस्य नादृष्टप्रा-
प्रयोजकताविशेषसंबंधेनानंतराभिधानविशिष्टसंबंधत्वस्यैववासंगतिलक्षणलक्षणता
वच्छेदकत्वेन प्रत्यक्षनिष्ठानुमानकार्यत्वस्य तदानाक्रांततयाऽनुमाननिष्ठप्रत्यक्षकार्यत्व
स्यैव तदाक्रांततया तस्य संगतिलक्षणाक्रांततयाऽसंगतित्वोपपत्तेः। एवमेव प्रत्यक्षकार्यनिरूपणा
नंतरं कारणनिरूपणानंतरं कारणत्वस्यापि संगतिलक्षणाक्रांतत्वमुपपादम्। ग्रंथे[illegible] सर्व
त्रसंगतिर्द्विविधा पूर्वाभिहितनिरूपितानंतराभिधेयनिष्ठाऽनंतराभिधेयनिरूपिता पूर्वाभिहित

प्रत्यक्ष

निष्ठा च। अनुमाननिष्ठकार्यत्वमाद्या प्रत्यक्षनिष्ठमनुमानकारणत्वं च द्वितीया पर
स्परसंगतेरैवौचित्यावर्जितत्वेन संपद्यासिद्धूर्वैतद्वयोरप्यनंतराभिधानप्रयोजकसंबं
धत्वरूपसंगतिपदप्रवृत्तिनिमित्ताक्रांतत्वेनैकपोषस्थापकत्वेऽप्यपूर्वकत्वाच्च पक्षचाधार

न्या. कौ.
२

घटो घट इत्यादौ प्रामाण्यबोधानुभवेन तत्सामग्र्यप्रसिद्ध्या ऽऽपादकाभावात् न च योग्यताज्ञान
स्यानतिप्रसक्तस्यैव तस्य हेतुत्वे विशेष्यतावच्छेदकभेदेनानंतहेतुतापत्तिरिति विशेष्यताव
च्छेदकनिष्ठप्रत्यासत्त्यैव तस्य हेतुतया द्रव्यं घट इत्यादिस्थलीयशाब्दसामग्र्यापादिकेति वा
च्यम् प्रामाण्यज्ञानोत्तेजकत्वाद्यनुरोधेन योग्यताज्ञानस्य विशेष्यतावच्छेदकभेदे
नात्मनिष्ठप्रत्यासत्त्यैव हेतुत्वात् प्रत्युत विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या तस्य
हेतुत्वे तथापि न तत्क्षतिः विशेष्यतावच्छेदकतासंबंधेन घटत्वाद्यवच्छिन्नप्रकारताशालिशाब्द
बोधं प्रति घटत्वाद्यवच्छिन्नविशेष्यतानिरूपितावच्छेदकतासंबंधेनैव घटत्वाद्यवच्छिन्नप्रकार
ताशालियोग्यताज्ञानस्य हेतुतया घटो द्रव्यमित्यादौ तादृशाकारकज्ञानाभावेन शाब्दबोधा
भावात् प्रकारतानिरूपितघटत्वाद्यवच्छिन्नत्वादिपर्याप्त्यवच्छेदकतायास्तत्तेन घटो नी

राम
३

ग

तत्रानुमितिकारणमनुमानम् अत्रानुमितिकरणत्वं लक्षणम् अनुमान
त्वं लक्ष्यतावच्छेदकम् नन्वत्रानुमानत्वस्यानुमितिकरणत्वरूपतया ल
क्षणलक्ष्यतावच्छेदकयोरभेदः न च शाब्दीयानुमानव्यवहारविषयत्वमे
वात्र लक्ष्यतावच्छेदकमिति वाच्यम् भावव्युत्पत्त्यानुमितावपि शाब्दीयानु
मानव्यवहारविषयत्वेन तत्साधारणत्वस्य लक्ष्यतावच्छेदकस्यासंभवात्
न च लक्षणलक्ष्यतावच्छेदकयोरभेदेन दोषस्तत्कृतमेवेति वाच्यम् तथापि घ
टो घट इत्यादाविव पौनरुक्त्यात् लक्षणस्याकाङ्क्षाजन्यशाब्दबोधानुपपत्तेः अ
पघटो पट इत्यादौ कथं न शाब्दबोधः अन्यत्र लक्षणशाब्दबोधसामग्र्या
स्तत्रापि सत्त्वात् इति चेन्न शाब्दबोधसामग्र्या विषयभेदेन भिन्नत्वात् तथा

न्या· को·
७

द्बोधनारकः नीलघटत्वादिभेदहेतुतायां घटो नीलघट इत्यादौ विशिष्ट
स्यानतिरिक्ततया घटत्वादौ नीलघटत्वादिभेदाभावेन व्यभिचार एतत् उप
दर्शितं ॥ त्या लघुरूपेणोपपत्तावनहेतुतावच्छेदक संबंध घटं विशिष्यांशं तायां
घटत्वावच्छिन्नत्व निवेशेनैवोपपत्तौ घटत्वादिभेदस्यातिरिक्तानं
तहेतुताकल्पने गौरवात् ॥ एतेन तदनवच्छिन्नप्रकारताशालिबोधकत्वात्त्व
क तदविषयक प्रतीति विषयत्वरूप पारिभाषिक तद्भेदहेतुतं गीका
रेण घटो घट इत्यादौ शाब्दबोधवारणं संभवति घटत्वादे पारिभाषिक
नीलघटत्वादिभेदसत्त्वेनोक्त व्यभिचाराऽसंभवादित्यपि निरस्तम् त
थाप्यतिरिक्तानंतहेतुताप्रयुक्त गौरवस्य दुर्वारत्वात् इति चेन्नैवम्

क

तप
७

लघट इत्यादौ न व्यभिचारः अत्र कार्य्यताद्विशेष्यतायां घटत्वाद्यवच्छिन्नत्व(
निवेशान्नोक्तव्यभिचार इति न शंकं तथापि द्रव्यं नीलघट इति प्रयोगापत्तेः ज्ञानात्त
द्रव्यं घट इति शाब्दानुभवेन कारणतादिविशिष्टघटत्वाद्यवच्छिन्नत्वस्य नि
वेशे तथापि द्रव्यं नीलघट इति न व्यभिचारवारणाय कार्य्यतादिशितन्निवेशस्य
आवश्यकत्वात् अनुवाततथा तथापि नास्माकं क्षति नवीनास्तु विशेष्य
तावच्छेदकतया घटत्वाद्यवच्छिन्नप्रकारताशालिशाब्दबोधे घटत्वादिमद
स्यातिरिक्तहेतुत्वम् अंगीकृत्य घटो घट इत्यादौ शाब्दबोधं वारयंति तन्नियम
तथा सति घटो नीलघट इत्यादौ व्यभिचारवारणाय शुद्धघटत्वाद्यवच्छिन्न
त्वस्यैव प्रकारतायां निवेशनावश्यपेपापां नीलघटो नीलघट इत्यादिशा

कारके इत्यधिकृत्य ध्रुवमपायेऽपादानम् १।४।२४। विश्लेषेऽवधिभूतं कारकसंज्ञं सत्
अपादानसंज्ञं स्यात् ग्रामादायाति पर्वतात्पतितः जुगुप्सा विरामप्रमादार्थानामुप
संख्यानम् धर्माज्जुगुप्सते पापाद्विरमति धर्मात्प्रमाद्यति भीत्रार्थानां भयहेतुः १।४।२५।
भयार्थानां त्राणार्थानां च धातूनां प्रयोगे भयहेतुरपादानं स्यात् चौराद्बिभेति चौरात्त्राय
ते भयहेतुः किम् अरण्ये बिभेति पराजेरसोढः १।४।२६। परापूर्वस्य जयतेः प्रयोगेऽस
सोढोऽर्थस्तत्कारकमपादानं स्यात् अध्ययनात्पराजयते असोढः किं शत्रून्पराजयते
वारणार्थानामीप्सितः १।४।२७। वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थस्तत्कारकमपाद
नं स्यात् यवेभ्यो गां वारयति ईप्सितः किम् यवेभ्यो गां वारयति क्षेत्रे १।४।२८। X अंतर्द्धौ
येनादर्शनमिच्छति X व्यवधाने सति स्वात्मकर्तृकदर्शनाभावं यत्कर्तृकमिच्छति तत्का
रकमपादानं स्यात् उपाध्यायादंतर्द्धत्ते मातुर्निलीयते कृष्णः अंतर्द्धौ किं चौरान्न दिदृक्षते
इच्छतिग्रहणं किम् अदर्शनेच्छायां सत्यपि दर्शने यथा स्यात् आख्यातोपयोगे १।४।२९।
नियमपूर्वकं विद्याग्रहणे यो वक्ता तत्कारकमपादानं स्यात् उपाध्यायादधीते उपयोगे
किं नटस्य शृणोति

जनिकर्तुः प्रकृतिः १।४।३०। उत्पद्यमानस्य यो हेतुः तत्कारकमपादानं स्यात् गोमयाद्वृ
श्चिको जायते भुवः प्रभवः १।४।३१ भवनं भूः उत्पत्तिः तत्कर्तुः प्रथमप्रकाशस्थानं तत्का
रकमपादानं स्यात् हिमवतो गंगा प्रभवति प्रथमतः उपलभ्यते इत्यर्थः कर्मणा यम
भिप्रैति स संप्रदानम् १।४।३२। ददातिकर्मणा करणभूतेन कर्ता यमभिप्रैति तत्कारकं संप्र
दानं स्यात् विप्राय गां ददाति

जनिकर्तुः प्रकृतिः १।४।३०। उत्पद्यमानस्य यो हेतुस्तत्कारकमपादानं स्यात् गोमयाद्वृ
श्चिको जायते भुवः प्रभवः १।४।३१ भवनं भूः उत्पत्तिः तत्कर्तुर्यत्प्रकाशस्थानं तत्का
रकमपादानं स्यात् हिमवतो गंगा प्रभवति प्रथमतउपलभ्यते इत्यर्थः कर्मणा यम
भिप्रैति संप्रदानम् १।४।३२। ददातिकर्मणा करणभूतेन कर्ता यमभिप्रैति तत्कारकं संज्ञं
सत्संप्रदानं स्यात् विप्राय गां ददाति